श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

॥ श्रीबालमुकुन्दाष्टकम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीबालमुकुन्दाष्टकम् ॥

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम्।
वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि॥ 1॥

संहृत्य लोकान् वटपत्रमध्ये -
शयानमाद्यन्तविहीनरूपम्।
सर्वेश्वरं सर्वहितावतारं
बालं मुकुन्दं मनसा स्मरामि॥ 2॥

इन्दीवरश्यामलकोमलाङ्गं
इन्द्रादिदेवार्चितपादपद्मम्।
सन्तानकल्पद्रुममाश्रितानां
बालं मुकुन्दं मनसा स्मरामि॥ 3॥

लंबालकं लंबितहारयष्टिं
शृङ्गारलीलाङ्कितदन्तपङ्क्तिम्।
बिंबाधरं चारुविशालनेत्रं
बालं मुकुन्दं मनसा स्मरामि॥ 4॥

शिक्ये निधायाद्य पयोदधीनि
बहिर्गतायां व्रजनायिकायाम्।
भुक्त्वा यथेष्टं कपटेन सुप्तं
बालं मुकुन्दं मनसा स्मरामि॥ 5॥

कलिन्दजान्तस्थितकालियस्य
फणाग्ररङ्गे नटनप्रियन्तम्।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं
बालं मुकुन्दं मनसा स्मरामि॥ 6॥

उलूखले बद्धमुदारशौर्यं
उत्तुङ्गयुग्मार्जुनभङ्गलीलम्।
उत्फुल्लपद्मायतचारुनेत्रं
बालं मुकुन्दं मनसा स्मरामि॥ 7॥

आलोक्य मातुर्मुखमादरेण
स्तन्यं पिबन्तं सरसीरुहाक्षम्।
सच्चिन्मयं देवमनन्तरूपं
बालं मुकुन्दं मनसा स्मरामि॥ 8॥

॥ इति श्रीबालमुकुन्दाष्टकं समाप्तम्॥